दिनांक
५-१२-२० शास्त्री तृतीयवर्ष, विषय - व्याकरण
ग्रन्थ - परमलघुमञ्जूषा।

प्र० २१ - आकाङ्क्षा निरूपणं समुचितं कर्तव्यः।

उत्तर — शाब्दबोधे सहकारिकारणानि आकाङ्क्षा-योग्यता-तात्पर्य-आसत्ति कारणम्। तत्र समय प्राप्ता काङ्क्षा। शाब्दबोधं प्रति ज्ञप्ति ज्ञानस्य कारणत्वं निरूपयामहे इति भावः। सहकारिकारणत्वञ्च मुख्यकारणजन्यकार्यजनकत्वे सति मुख्यकारणभिन्नत्वम्। सहकारिकारणानां चतुर्विधत्वं निरूपयति - व्यासस्य यः समयः संकेतस्तद्ग्राहि ना तद्विषयक बोधजनकेति आका। सा चैकपदार्थ ज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा। अस्याः आश्रयः कः? इत्यत्र रूपा पुरुषनिष्ठैव तथापि तस्याः स्वविषयेऽर्थे आरोपः। अतएव पदोऽयमाकाङ्क्षतीति व्यवहारात्। न चाकाङ्क्षा यत्किञ्चिद् विषयकेच्छा रूपेण तस्याः कथमुक्त संकेतग्राहकत्वम्। इदमेव जिज्ञासापर्यवसानमित्युच्यते। पदे तु नारोपः, अर्थबोधोत्तरमेवाकाङ्क्षोदयात्। पदस्याकाङ्क्षाभावे तु साकाङ्क्षार्थबोधकमित्यर्थ कम्। तदुक्तं समर्थः स्वे आख्या- परस्परव्यपेक्षां सामर्थ्यमेके। कापुनरत्राकाङ्क्षा व्यपेक्षा न ब्रूमस्तस्याव्यापारिति।

ननु घट घटमानय इत्यादौ द्वयोः पदार्थयो ~~र्ज्ञा~~ र्ज्ञानं जाते तदानीमेकरूपायामाकाङ्क्षाया अभावात् शाब्दबोधानापत्तिरिति चेन्न, एकपदार्थ ज्ञाने इत्यर्थत्वात्। एकपदार्थ मात्रज्ञाने सति तत्रापि तस्याः सत्त्वेनादोषात्। आकाङ्क्षायाः चेतनधर्मत्वं प्रतिपादयति - अन्यपदार्थ इत्यंशोऽपेक्षितः अग्रे तथापि इत्यस्योक्तत्वात् अन्यैकशब्देन पदार्थनिष्ठत्वं निराकृतमिति बोध्यम्।
नैयायिकमते नात्मधर्मत्वम्, वेदान्तिमते अन्तःकरणधर्मत्वम् आकाङ्क्षाया बोध्यम्। नव्यैरपि आकाङ्क्षाया आत्मधर्मत्वे अथ मर्थान्तरं आकाङ्क्षते इति प्रातिकूल व्यवहारानुपपत्तिः।
ईदृशजिज्ञासोत्थापकं चैकपदार्थेऽपरपदार्थ व्यतिरेक प्रयुक्तान्वयबोधजनकत्वस्य ज्ञानमिति तद्विषये तादृशान्वयबोधजनकत्वेऽस्याकाङ्क्षेति व्यवहारः।

आकाङ्क्षायाः पुरुषनिष्ठत्वे सम्बन्धे नार्थे आरोपे गौरवात्, आन्तर्य विषयणी जिज्ञासा आकाङ्क्षा।
मञ्जू० - उत्थापकता निरूपकतान्यतर सम्बन्धेनोभय सम्बन्धेन वाऽर्थान्तरजिज्ञासा आकाङ्क्षा। यद्यपि मृगो धावति इति अत्र दर्शनार्थकारम् धावनाकाङ्क्षा उत्थापकत्वं धावनं तु तद्विषयत्व अन्वये तण्डुलं पचति देवदत्तः इत्यादौ क्रियाकारकयोर्द्वयोरपि परस्परं तदुत्थापकत्वात् तद्विषयत्वाच्च।
एवञ्च क्रियाकारकयोः पाककर्मणोर्द्वयोरपि तदुत्थापकत्वात् आकाङ्क्षोत्थापकत्वात्, तद्विषयत्वात् आकाङ्क्षाविषयत्वात् उभयसम्बन्धेनार्थान्तरविषयणी जिज्ञासारूपाकाङ्क्षेति सिद्धम्) अतएव पूर्वोक्तसम्बन्धे न विद्यमानाकाङ्क्षायाः शाब्दबोधे हेतुत्वादेव व्यर्थः। नान्वयबोध इति यथा घटमानय इत्यत्रैक पदार्थ ज्ञाते परपदार्थान्वय विषयणी जिज्ञासा सत्त्वात् घट कर्म आनयनविषयको बोधो भवति तथैव घटः कर्मत्वम् आनयनं कृतिः इत्यत्र नान्वयो दृश्यते, आकाङ्क्षाया अभावात्। विभक्त्यन्ताख्यात प्रकृतिका पदानामेवान्वयोपस्थापकत्वम्, तद्धर्मानामेव परस्पर साकाङ्क्षत्वमिति स्वीकृतत्वाच्च अन्वयबोधजनकत्वज्ञानं वक्ष्यमाण समभिव्याहार कारणताज्ञान भूतमिति तत्र समभिव्याहारनिष्ठबोध कारणतापि आकाङ्क्षा। अतएव यस्य समभिव्याहारस्य यादृशान्वयबोधजनकता गृहीतस्तस्य तादृश समभिव्याहारात् तादृशान्वयबोधोऽभवदिति।

अमरनाथ मिश्र
एम० प्रो० व्याकरण
रा०उ०सं०म०वि०
सुकुल सिंगा
~~[illegible]~~
पूर्णिया

दिनाङ्क
४-१२-२०
उपशास्त्री द्वितीयवर्ष, विषय-व्याकरण (V)
लघु-सिद्धान्त कौमुदी, तुदादिगणः

१ सीदति – षद्लृ धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। धात्वादेः षः सः इति सूत्रेण सत्वे। सार्वधातुक संज्ञायां शपं प्रबाध्य तुदादिभ्यः शः इति सूत्रेण श प्रत्यये अनुबन्ध लोपे पाघ्राध्मास्थाम्नादाण् दृश... इति सूत्रेण षदस्थाने सीदादेशे कृते सीदति इति सिद्धम्।

२- किरति – कॄ धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे। सार्वधातुक संज्ञायाम् शप् प्रबाध्य तुदादिभ्यः शः इति श प्रत्यये अनुबन्ध लोपे। ॠत इद्धातोः इति सूत्रेण ॠकारस्य स्थाने इत्वे रपरत्वे किरति इतिसिद्धम्।

३ - चकार – कृ धातोर्लिट् लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये, परस्मैपदानां णल... इति सूत्रेण तिप्स्थाने णलादेशे अनुबन्ध लोपे। लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे अभ्यास संज्ञायाम्, ह्रस्वः इति ह्रस्वे, उरत् इति सूत्रेण अत्वे रपरत्वे हलादि शेषे, कुहोश्चुः इति सूत्रेण चुत्वे ककारस्य स्थाने च, वृद्धौ रपरत्वे कृते चकार इतिसिद्धम्

४ उपस्किरति – कृ धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धे। सार्वधातुक संज्ञायाम् शप् प्रबाध्य तुदादिभ्यः शः इति सूत्रेण श प्रत्यये अनुबन्ध लोपे। ॠत इद्धातोः इति सूत्रेण ॠकारस्य स्थाने इत्वे रपरत्वे कृते, किरतौ लवने इति सूत्रेण सुडागमे अनुबन्ध लोपे ~~उपस्किरति इतिसिद्धम्~~। अड् अभ्यासव्यवायेऽपि सुट् कात् पूर्व इति वक्तव्यम् इति वार्तिकबलात् कृतः पूर्वं सुडागमे। उपस्किरति इति सिद्धम्।

अमरनाथ मिश्र
स० प्रो० व्याकरण
रा० उ० सं० म० वि०
[illegible] पूर्णिमा